# Shri Subrahmanya Puja Vidhi

# સુબ્રહ્મણ્યપૂજાવિધિઃ

## Document Information

Text title : subrahmaNyapUjAvidhiH

File name : subrahmaNyapUjAvidhiH.itx

Category : subrahmanya, pUjA

Location : doc_subrahmanya

Transliterated by : Mahaperiaval trust, Preeti N Bhandare

Proofread by : Preeti N Bhandare

Description-comments : Subramanya Sthuthi Manjari, Ed. S.V.Radhakrishna Sastri. See corresponding stotram

Latest update : May 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# સુબ્રહ્મણ્યપૂજાવિધિઃ

ૐ નમો નારાયણાય નમઃ
શ્રીસુબ્રહ્મણ્યાય પરસ્મૈ બ્રહ્મણે નમઃ ।
શ્રીસુબ્રહ્મણ્યસ્તુતિમઞ્જરી સુબ્રહ્મણ્યલઘુપૂજાવિધિઃ

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં વન્દે સર્વવિઘ્નોપશાન્તયે ॥

પ્રાણાયામઃ । વિઘ્નેશ્વરપૂજા ।

સઙ્કલ્પઃ-
મમોપાત્ત સમસ્ત દુરિત ક્ષયદ્વારા શ્રીપરમેશ્વર
પ્રીત્યર્થં, શુભે શોભને મુહૂર્તે અદ્ય બ્રહ્મણઃ દ્વિતીયપરાર્ધે
શ્વતવરાહકલ્પે વૈવસ્વતમન્વન્તરે અષ્ટાવિંશતિતમે કલૌ યુગે
પ્રથમે પાદે જમ્બૂદ્વીપે ભારતવર્ષે ભરતખણ્ડે મેરોઃ દક્ષિણે પાર્શ્વે
શકાબ્દે અસ્મિન્ વર્તમાને વ્યાવહારિકે
પ્રભવાદિષષ્ટિસંવત્સરાણાં મધ્યે.....નામ
સંવત્સરે.....અયને.....ઋતૌ.....માસે.....પક્ષે
.....વાસરયુક્તાયાં.....નક્ષત્રયુક્તાયાં
શુભયોગ શુભકરણૈવગુણં વિશેષણ
વિશિષ્ટાયાં અસ્યાં.....શુભતિથૌ
શ્રીવલ્લીદેવસેનાસમેત શ્રીસુબ્રહ્મણ્યપ્રીત્યર્થં અસ્માકં
સહકુટુમ્બાનાં ક્ષેમસ્થૈર્યવીર્યવિજયા યુરારોગ્યૈશ્વર્યાણાં
અમભિવૃદ્ધ્યર્થં સત્સન્તાનસૌભાગ્યસિદ્ધ્યર્થં
સર્વારિષ્ટનિવૃત્ત્યર્થં સર્વાભીષ્ટસિદ્ધ્યર્થં યાવચ્છક્તિ ભગવતઃ
શ્રીસુબ્રહ્મણ્યસ્ય ધ્યાનાવાહનાદિ ષોડશોપચારપૂજાં કરિષ્યે ॥

ઇતિ સઙ્કલ્પ્ય ।

વિઘ્નેશ્વર મુદ્વાસ્ય । પૂર્વાઙ્ગપૂજા ।

સેનાધિપ મહાબાહો ષણ્મુખેશ્વરનન્દન ।
મયૂરવાહન સ્વામિન્ શક્તિદ્વય સમન્વિત ॥

કરુણાકર ભક્તેષ્ટવરદાદ્રિસુતાસુત ।
દ્વિષડ્ભુજ કુમાર ત્વં પ્રસન્નો ભવ સર્વદા ॥

સિંહાસને સુખાસીનં સૂર્યકોટિસમપ્રભમ્ ।
ધ્યાયામિ દેવં તં ભક્ત્યા સ્કન્દં શરવણોદ્ભવમ્ ॥

વલ્લીદેવસેનાસમેતશ્રીસુબ્રહ્મણ્યં ધ્યાયામિ ॥

સુબ્રહ્મણ્ય મહાભાગ ક્રૌઞ્ચાખ્યગિરિભેદન ।
આવાહયામિ દેવ ત્વાં ભક્તાભીષ્ટપ્રદો ભવ ॥

સુબ્રહ્મણ્યં આવાહયામિ ॥

અગ્નિપુત્ર મહાભાગ કાર્તિકેય સુરાર્ચિત ।
રત્નસિંહાસનં દેવ ગૃહાણ વરદાવ્યય ।
સુબ્રહ્મણ્યાય નમઃ । આસનં સમર્પયામિ ॥

ગણેશાનુજ દેવેશ વલ્લીકામદવિગ્રહ ।
પાદ્યં ગૃહાણ ગાઙ્ગેય ભક્ત્યા દત્તં સુરાર્ચિત ।
સુબ્રહ્મણ્યાય નમઃ । પાદ્યં સમર્પયામિ ॥

બ્રહ્માદિ દેવવૃન્દાનાં પ્રણવાર્થોપદેશક ।
અર્ઘ્યં ગૃહાણ દેવેશ તારકાન્તક ષણ્મુખ ।
સુબ્રહ્મણ્યાય નમઃ । અર્ઘ્યં સમર્પયામિ ॥

એલાકુઙ્કુમકસ્તૂરીકર્પૂરાદિસુવાસિતૈઃ ।
તીર્થૈરાચમ્યતાં દેવ ગઙ્ગાધરસુતાવ્યય ।
સુબ્રહ્મણ્યાય નમઃ । આચમનીયં સમર્પયામિ ॥

સ્વામિન્ શરવણોદ્ભૂત શૂરપદ્માસુરાન્તક ।
ગઙ્ગાદિસલિલૈઃ સ્નાહિ દેવસેનામનોહર ।
સુબ્રહ્મણ્યાય નમઃ । સ્નર્પયામિ ॥

શર્કરા મધુ ગોક્ષીર ફલસાર ઘૃતૈર્યુતમ્ ।
પઞ્ચામૃતસ્નાનમિદં બાહુલેય ગૃહાણ ભો ।
સુબ્રહ્મણ્યાય નમઃ । પઞ્ચામૃત સ્નાનં સમર્પયામિ ॥

પુનઃ શુદ્ધોદક-સ્નાનં સમર્પયામિ ॥

દુકૂલ-વસ્ત્રયુગલં મુક્તાજાલ-સમન્વિતમ્ ।
પ્રીત્યા ગૃહાણ ગાઙ્ગેય ભક્તાપદ્ભઞ્જનક્ષમ ।
સુબ્રહ્મણ્યાય નમઃ । વસ્ત્રયુગ્મં સમર્પયામિ ॥

રાજતં બ્રહ્મસૂત્રં ચ કાઞ્ચનં ચોત્તરીયકમ્ ।
યજ્ઞોપવીતં દેવેશ ગૃહાણ સુરનાયક ।
સુબ્રહ્મણ્યાય નમઃ । ઉપવીતં સમર્પયામિ ॥

નિત્યાગ્નિહોત્રસમ્ભૂતં વિરજાહોમભાવિતમ્ ।
ગૃહાણ ભસ્મ હે સ્વામિન્ ભક્તાનાં ભૂતિદો ભવ ।
સુબ્રહ્મણ્યાય નમઃ । ભસ્મરક્ષાં સમર્પયામિ ॥

કસ્તૂરી-કુઙ્કુમાદ્યૈશ્ચ વાસિતં સહિમોદકમ્ ।
ગન્ધં વિલેપનાર્થાય ગૃહાણ ક્રૌઞ્ચદારણ ।
સુબ્રહ્મણ્યાય નમઃ । ગન્ધાન્ ધારયામિ ॥

અક્ષતાન્ ધવલાન્ દિવ્યાન્ શાલેયાન્ તણ્ડુલાન્ શુભાન્ ।
કાઞ્ચનાક્ષત-સંયુક્તાન્ કુમાર પ્રતિગૃહ્યતામ્ ।
સુબ્રહ્મણ્યાય નમઃ । અક્ષતાન્ સમર્પયામિ ॥

પુન્નાગ-વકુલાશોક-નીપ-પાટલ-જાતિ ચ ।
વાસન્તિકા બિલ્વજાજી-પુષ્પાણિ પરિગૃહ્યતામ્ ।
સુબ્રહ્મણ્યાય નમઃ । પુષ્પાણિ સમર્પયામિ ॥

અઙ્ગપૂજા ॥

સુરવન્દિત પાદાય નમઃ । પાદૌ પૂજયામિ । મુકુરાકાર જાનવે નમઃ જાનુની પૂજયામિ । કરિરાજકરોરવે નમઃ ઊરૂ પૂજયામિ । રત્નકિઙ્કિણિકાયુક્તકટયે નમઃ કટિં પૂજયામિ । ગુહાય નમઃ ગુહ્યં પૂજયામિ । હેરમ્બસહોદરાય નમઃ ઉદરં પૂજયામિ । સુનાભયે નમઃ નાભિં પૂજયામિ । સુહૃદે નમઃ હૃદયં પૂજયામિ । વિશાલવક્ષસે નમઃ વક્ષઃ સ્થલં પૂજયામિ । કૃત્તિકાસ્તનન્ધયાય નમઃ સ્તનૌ પૂજયામિ । શત્રુજયોર્જિતબાહવે નમઃ । બાહૂન્ પૂજયામિ । શક્તિહસ્તાય નમઃ । હસ્તાન્ પૂજયામિ । પુષ્કરસ્રજે નમઃ । કણ્ઠં પૂજયામિ । ષણ્મુખાય નમઃ મુખાનિ પૂજયામિ । સુનાસાય નમઃ નાસિકે પૂજયામિ ।

દ્વિષણ્ણેત્રાય નમઃ નેત્રાણિ પૂજયામિ । હિરણ્યકુણ્ડલાય
નમઃ કર્ણૌ પૂજયામિ । ભાલનેત્રસુતાય નમઃ ભાલં પૂજયામિ ।
વેદશિરોવેદ્યાય નમઃ શિરઃ પૂજયામિ । સેનાપતયે નમઃ સર્વાણ્યઙ્ગાનિ
પૂજયામિ ॥

સુબ્રહ્મણ્યાષ્ટોત્તરશતનામભિઃ અર્ચના ॥

દશાઙ્ગ ગુગ્ગુલૂપેતં સુગન્ધિ સુમનોહરમ્ ।
કપિલાઘૃતસંયુક્તં ધૂપં ગૃહ્ણીષ્વ ષણ્મુખ ॥

સુબ્રહ્મણ્યાય નમઃ ધૂપ માઘ્રાપયામિ ।
સાજ્યં ત્રિવર્તિસંયુક્તં વહ્નિના યોજિતં મયા ।
દીપં ગૃહાણ સ્કન્દેશ ત્રૈલોક્યતિમિરાપહમ્ ॥

સુબ્રહ્મણ્યાય નમઃ દીપં દર્શયામિ ।
લેહ્યં ચોષ્યં ચ ભોજ્યં ચ પાનીયં ષડ્રસાન્વિતમ્ ।
ભક્ષ્યશાકાદિસંયુક્તં નૈવેદ્યં સ્કન્દ ગૃહ્યતામ્ ॥

સુબ્રહ્મણ્યાય નમઃ મહાનૈવેદ્યં નિવેદયામિ ॥

પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ ।
કર્પૂરચૂર્ણસંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥

સુબ્રહ્મણ્યાય નમઃ તામ્બૂલં સમર્પયામિ ।
દેવસેનાપતે સ્કન્દ સંસારધ્વાન્તભાસ્કર ।
નીરાજનમિદં દેવ ગૃહ્યતાં સુર સત્તમ ॥

સુબ્રહ્મણ્યાય નમઃ કર્પૂરનીરાજનં દર્શયામિ ।
પુષ્પાઞ્જલિં પ્રદાસ્યામિ ભક્તાભીષ્ટપ્રદાયક ।
ગૃહાણવલ્લીરમણ સુપ્રીતેનાન્ત રાત્મના ॥

સુબ્રહ્મણ્યાય નમઃ પુષ્પાઞ્જલિં સમર્પયામિ ॥

દેવસેનાપતે સ્વામિન્ સેનાનીરખિલેષ્ટદ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવ સર્વદા ॥

શ્રીસુબ્રહ્મણ્યાય નમઃ-ઇદમર્ઘ્યં ઇદમર્ઘ્યં ઇદમર્ઘ્યમ્ ।

ચન્દ્રાત્રેય મહાભાગ સોમ સોમવિભૂષણ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવ સર્વદા ॥

રોહિણીસહિત ચન્દ્રાય નમઃ ॥ ઇદમર્ઘ્યં ઇદમર્ઘ્યં ઇદમર્ઘ્યમ્ ।
નીલકણ્ઠ મહાભાગ સુબ્રહ્મણ્યસુવાહન ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવ સર્વદા ॥

મયૂરાય નમઃ । ઇદમર્ઘ્યં ઇદમર્ઘ્યમ્ ॥

સુબ્રહ્મણ્ય સ્વરૂપસ્ય બ્રાહ્મણસ્ય ઇદમાસનમ્ ।
ગન્ધાદિસકલારાધનૈઃ સ્વર્ચિતમ્ ॥

સેનાનીઃ પ્રતિગૃહ્ણાતિ સેનાનીર્વૈ દદાતિ ચ ।
સેનાનીસ્તારકો દ્વાભ્યાં સેનાન્યૈ તે નમો નમઃ ॥

ઇદમુપાયનં સદક્ષિણાકં સતામ્બૂલં વલ્લીદેવસેનાસમેત શ્રીસુબ્રહ્મણ્ય
પ્રીતિં કામયમાનસ્તુભ્યમહં સમ્પ્રદદે ॥ ઇત્યુપાયનદાનમ્ ॥

શ્રીસુબ્રહ્મણ્યઃ સુપ્રીતઃ સુપ્રસન્નો વરદો ભવતુ ॥

શ્રીસુબ્રહ્મણ્યપૂજાવિધિઃ ।
આબ્રહ્મલોકાદ્ આશેષાદ્ આલોકાલોકપર્વતાત્ ।
યે વસન્તિ દ્વિજા દેવાઃ તેભ્યો નિત્યં નમો નમઃ ॥

ૐ નમો બ્રહ્માદિભ્યો બ્રહ્મવિદ્યાસમ્પ્રદાયકર્તૃભ્યો વંશર્ષિભ્યો
નમો ગુરુભ્યઃ । સર્વોપપ્લવરહિત-પ્રજ્ઞાનઘન-પ્રત્યગર્થો
બ્રહ્મૈવાહમસ્મિ । સોઽહમસ્મિ-બ્રહ્માહમસ્મિ ।
શ્રીનાથાદિગુરુત્રયં ગણપતિં પીઠત્રયં ભૈરવં
સિદ્ધૌઘં વટુકત્રયં પદયુગં દૂતીક્રમં મણ્ડલમ્ ।
વીરાન્ દ્વ્યષ્ટચતુષ્કષષ્ટિનવકં વીરાવલીપઞ્ચકં
શ્રીમન્માલિનિ મન્ત્રરાજસહિતં વન્દે ગુરોર્મણ્ડલમ્ ॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુસ્સાક્ષાત્પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥

વન્દે ગુરુપદદ્વન્દ્વં અવાઙ્મનસગોચરમ્ ।
રક્તશુક્લપ્રભામિશ્રં અતર્ક્યં ત્રૈપુરં મહઃ ॥

નારાયણં પદ્મભુવં વસિષ્ઠં શક્તિં ચ તત્પુત્રપરાશરં ચ ।
વ્યાસં શુકં ગૌડપદં મહાન્તં ગોવિન્દયોગીન્દ્રં અથાસ્ય શિષ્યમ્ ।
શ્રીશઙ્કરાચાર્યમથાસ્ય પદ્મપાદં ચ હસ્તામલકં ચ શિષ્યમ્
તં તોટકં વાર્ત્તિકકારમન્યાન્ અસ્મદ્ગુરૂન્ સન્તતમાનતોઽસ્મિ ॥

દ્વારપૂજા । (ૐ-હ્રીં-શ્રીં-૩)
ૐ હ્રીં શ્રીં । ગં-ગણપતયે નમઃ । (દક્ષભાગે)
ૐ હ્રીં શ્રીં । સં સરસ્વત્યૈ નમઃ । (વામભાગે)
ૐ હ્રીં શ્રીં । પં પતઙ્ગાય નમઃ । (ઊર્ધ્વે)
ૐ હ્રીં શ્રીં । ગં ગજલક્ષ્મ્યૈ નમઃ । (મધ્યે)
દ્વારપાલકપૂજા ।
ૐ હ્રીં શ્રીં । સું સુદેહાય નમઃ । (દક્ષિણે)
ૐ હ્રીં શ્રીં । દીં દીપ્તાયૈ નમઃ । (દક્ષિણે)
ૐ હ્રીં શ્રીં । સું સુમુખાય નમઃ । (ઉત્તરે)
ૐ હ્રીં શ્રીં । સૂં સૂક્ષ્માય નમઃ । (ઉત્તરે)
તત્ત્વાચમનમ્ ।
ૐ હ્રીં શ્રીં । ૐ- આત્મતત્ત્વં શોધયામિ સ્વાહા ।
ૐ હ્રીં શ્રીં । સાં- વિદ્યાતત્ત્વં શોધયામિ સ્વાહા ।
ૐ હ્રીં શ્રીં । શરવણભવ- શિવતત્ત્વં શોધયામિ સ્વાહા ।
ૐ હ્રીં શ્રીં । ૐ સાં શરવણભવ- સર્વતત્ત્વં શોધયામિ સ્વાહા ॥ (ગુરુપાદુકામુદ્રાઙ્કુર્યાત્)
ઘણ્ટાપૂજા-
આગમાર્થં તુ દેવાનાં ગમનાર્થં ચ રક્ષસામ્ ।
કુર્વે ઘણ્ટારવં તત્ર દેવતાહ્વાનલાઞ્છનમ્ ॥

સકલ્પઃ-
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

મૂલેન પ્રાણાનાયમ્ય । દેશકાલૌ સઙ્કીર્ત્યશ્રીવલ્લીદેવસેનાસમેત
શ્રીસુબ્રહ્મણ્યસ્વામિપ્રસાદસિદ્ધ્યર્થં, યથાસમ્ભવદવ્યૈઃ યથાશક્તિ
સપર્યાક્રમં નિર્વર્તયિષ્યે । તેન પરમેશ્વરં પ્રીણયાનિ ।
"ૐ હ્રીં આધારશક્તિકમલાસનાય નમઃ" ।
ઇતિ પુષ્પાક્ષતૈઃ આસનં અભ્યર્ચ્ય, આસને ઉપવિશેત્ ॥

ૐ હ્રીં શ્રીં । ૐ સાં સુબ્રહ્મણ્યાય, શક્તિહસ્તાય, શરવણોદ્ભવાય,
અસુરકુલમર્દનાય, મયૂરવાહનાય, ગૌરીપુત્રાય, ષણ્મુખાય નમઃ ॥

(ઇતિ બદ્ધાઞ્જલિઃ પ્રાર્થયેત્ ।)

શ્રીગુરો દક્ષિણામૂર્ત્તે ભક્તાનુગ્રહકારક ।
અનુજ્ઞાં દેહિ ભગવન્ બ્રહ્મણ્યયજનાય મે ॥

લઘુપ્રાણપ્રતિષ્ઠા-
ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં ૐ હંસઃ સોઽહમ્ ।
સોઽહં હંસઃ શિવઃ । શ્રીસુબ્રહ્મણ્યપ્રાણાઃ ઇહ પ્રાણાઃ ।
ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં
શ્રીસુબ્રહ્મણ્યજીવઃ ઇહ સ્થિતઃ । સર્વેન્દ્રિયાણિ વાઙ્મનશ્ચક્ષુઃ
શ્રોત્રજિહ્વાઘ્રાણાઃ ઇહૈવ આગત્ય, અસ્મિન્ ચક્રે (બિમ્બે) સુખં ચિરં
તિષ્ઠન્તુ સ્વાહા ॥ ૐ અસુનીતે પુનરસ્માસુ ચક્ષુઃ પુનઃ પ્રાણમિહ
નો ધેહિ ભોગમ્ । જ્યોક્ પશ્યેમ સૂર્યમુચ્ચરન્તમનુમતે મૃળયાનઃ
સ્વસ્તિ ॥

પીઠશક્તિપૂજા
ૐ હ્રીં શ્રીં- મણ્ડૂકાય નમઃ ।
ૐ હ્રીં શ્રીં । કાલાગ્નિરુદ્રાય નમઃ ।
ૐ હ્રીં શ્રીં । મૂલપ્રકૃત્યૈ નમઃ ।
ૐ હ્રીં શ્રીં । આધારશક્ત્યૈ નમઃ ।
ૐ હ્રીં શ્રીં । કૂર્માય નમઃ ।
ૐ હ્રીં શ્રીં । અનન્તાય નમઃ ।
ૐ હ્રીં શ્રીં । વરાહાય નમઃ ।
ૐ હ્રીં શ્રીં । પૃથિવ્યૈ નમઃ ।
ૐ હ્રીં શ્રીં । અમૃતાર્ણવાય નમઃ ।
ૐ હ્રીં શ્રીં । નવરત્નમયદ્વીપાય નમઃ ।
ૐ હ્રીં શ્રીં । સ્વર્ણપર્વતાય નમઃ ।
ૐ હ્રીં શ્રીં । નવરત્નમયદ્વીપાય નમઃ ।
ૐ હ્રીં શ્રીં । સ્વર્ણપર્વતાય નમઃ ।
ૐ હ્રીં શ્રીં । નન્દનોદ્યાનાય નમઃ ।
ૐ હ્રીં શ્રીં । કલ્પકોદ્યાનાય નમઃ ।
ૐ હ્રીં શ્રીં । માણિક્યમણ્ડલાય નમઃ ।
ૐ હ્રીં શ્રીં । રત્નવેદિકાયૈ નમઃ ।
ૐ હ્રીં શ્રીં । શ્વેતચ્છત્રાય નમઃ ।
ૐ હ્રીં શ્રીં । રત્નસિંહાસનાય નમઃ ।

ॐ હ્રીં શ્રીં । ધર્માય નમઃ ।

ॐ હ્રીં શ્રીં । જ્ઞાનાય નમઃ ।

ॐ હ્રીં શ્રીં । વૈરાગ્યાય નમઃ ।

ॐ હ્રીં શ્રીં । ઐશ્વર્યાય નમઃ ।

ॐ હ્રીં શ્રીં । અધર્માય નમઃ ।

ॐ હ્રીં શ્રીં । અજ્ઞાનાય નમઃ ।

ॐ હ્રીં શ્રીં । અવૈરાગ્યાય નમઃ ।

ॐ હ્રીં શ્રીં । અનૈશ્વર્યાય નમઃ ।

ॐ હ્રીં શ્રીં । માયાયૈ નમઃ ।

ॐ હ્રીં શ્રીં । વિદ્યાયૈ નમઃ ।

ॐ હ્રીં શ્રીં । આનન્દકન્દાય નમઃ ।

ॐ હ્રીં શ્રીં । સંવિન્નાળાય નમઃ ।

ॐ હ્રીં શ્રીં । પ્રકૃતિમયપત્રેભ્યો નમઃ ।

ॐ હ્રીં શ્રીં । વિકૃતિમયકેસરેભ્યો નમઃ ।

ॐ હ્રીં શ્રીં । પઞ્ચાશદ્વર્ણ બીજાઢ્યકર્ણિકાયૈ નમઃ ।

ॐ હ્રીં શ્રીં । સૂર્યમણ્ડલાય નમઃ ।

ॐ હ્રીં શ્રીં । સોમમણ્ડલાય નમઃ ।

ॐ હ્રીં શ્રીં । વહ્નિમણ્ડલાય નમઃ ।

ॐ હ્રીં શ્રીં । સં સત્ત્વાય નમઃ ।

ॐ હ્રીં શ્રીં । રં રજસે નમઃ ।

ॐ હ્રીં શ્રીં । તં તમસે નમઃ ।

ॐ હ્રીં શ્રીં । આં આત્મને નમઃ ।

ॐ હ્રીં શ્રીં । અં અન્તરાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । પં પરમાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । હ્રીં જ્ઞાનાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । માયાતત્ત્વાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । કલાતત્ત્વાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । વિદ્યાતત્ત્વાત્મને નમઃ ।

ॐ હ્રીં શ્રીં । પરતત્ત્વાત્મને નમઃ । ઇતિ

પીઠમભ્યર્ચ્ય શકુન્યાદ્યષ્ટશક્તીઃ પ્રાચ્યાદ્યષ્ટદિક્ષુ અભ્યર્ચયેત્ ।

તદ્યથા- શકુન્યૈ નમઃ (પ્રાચ્યામ્) ॐ હ્રીં શ્રીં । રેવત્યૈ નમઃ (આગ્નેય્યામ્)

ॐ હ્રીં શ્રીં । ભૂતાયૈ નમઃ (દક્ષિણસ્યામ્) ॐ હ્રીં શ્રીં । મહાભૂતાયૈ નમઃ (નૈરૃત્યામ્)

ॐ હ્રીં શ્રીં । નિશીથિન્યૈ નમઃ (પ્રતીચ્યામ્) ॐ હ્રીં શ્રીં । માલિન્યૈ નમઃ (વાયવ્યામ્)
ॐ હ્રીં શ્રીં । શીતલાયૈ નમઃ (ઉદીચ્યામ્) ॐ હ્રીં શ્રીં । શુદ્ધાયૈ નમઃ (ઐશાન્યામ્)
ॐ હ્રીં શ્રીં । વિશ્વમુખાયૈ નમઃ (મધ્યભાગે)-
(ઇતિ પીઠશક્તીઃ સમ્પૂજ્ય, દીપં પ્રજ્વાલયેત્ ।)
દીપદેવિ મહાદેવિ શુભં ભવતુ મે સદા ।
યાવત્ પૂજાસમાપ્તિઃ સ્યાત્ તાવત્ પ્રજ્વલ સુસ્થિરા ॥

(ઇતિ દીપે પુષ્પાઞ્જલિં દત્ત્વા) ॐ હ્રીં શ્રીં । મૂલમન્ત્રેણ ચક્રમધ્યે
પુષ્પાઞ્જલિં દદ્યાત્ ॥

ભૂતશુદ્ધિઃ- શ્વાસસમીરં પિઙ્ગલયા અન્તરાકૃષ્ય -
“ॐ હ્રીં શ્રીં । મૂલાધારાત્ સુષુમ્ણાપથેન જીવશિવં પરમશિવપદે યોજયામિ સ્વાહા ॥ ”
ઇતિ મન્ત્રેણ મૂલાધારસ્થિતં જીવાત્માનં, સુષુમ્ણાવર્ત્મના બ્રહ્મરન્ધ્રં
નીત્વા, પરમશિવેન એકીભૂતં વિભાવ્ય, ઇડયા વાયું રેચયેત્ ॥
ॐ હ્રીં શ્રીં । યં (ઇડયા પૂરયિત્વા) સઙ્કોચશરીરં શોષય શોષય સ્વાહા ॥
(ઇતિ નિજશરીરં શોષિતં વિભાવ્ય, પિઙ્ગલયા રેચયેત્) ॥
ॐ હ્રીં શ્રીં । રં- (પિઙ્ગલયા પૂરયિત્વા) સઙ્કોચશરીરં દહ દહ-પચ પચ સ્વાહા ॥
(ઇતિ પ્લુષ્ટં ભસ્મીકૃતં ચ વિભાવ્ય, ઇડયા રેચયેત્) ॥
ॐ હ્રીં શ્રીં । લં (ઇડયા પૂરયિત્વા) પરમશિવામૃતં વર્ષય વર્ષય સ્વાહા ॥
(ઇતિ તદ્ભસ્મ, સહસ્રારેન્દુમણ્ડલવિગલદમૃતરસેન સિક્તં ચ વિભાવ્ય,
પિઙ્ગલયા રેચયેત્) ।
ॐ હ્રીં શ્રીં । વં (પિઙ્ગલયા પૂરયિત્વા) શામ્ભવશરીરં ઉત્પાદયોત્પાદય સ્વાહા ॥
(ઇતિ તદ્ભસ્મનો દિવ્યશરીરમુત્પન્નં વિભાવ્ય, ઇડયા રેચયેત્) ॥
ॐ હ્રીં શ્રીં । હંસઃ સોઽહમ્ (ઇડયા પૂરયિત્વા) ઉવતર અવતર
શિવપદાજ્જીવ સુષુમ્ણાપથેન પ્રવિશ મૂલશૃઙ્ગાટકમ્ । ઉલ્લસોલ્લસ,
જ્વલ જ્વલ, પ્રજ્વલ-પ્રજ્વલ-હંસઃ સોઽહં સ્વાહા ।
ઇતિ પરમશિવેન એકીકૃતં જીવં, પુનઃ સુષુમ્ણા વર્ત્મના
મૂલાધારે સ્થાપિતં ચિન્તયેત્ ॥

આત્મપ્રાણપ્રતિષ્ઠા -
“આં-સોઽહમ્ ” હૃદયે હસ્તં નિધાય,
ત્રિઃ પઠેત્ । અથ મૂલેન પ્રાણાનાયમ્ય,
ॐ હ્રીં શ્રીં । અપસર્પન્તુ તે ભૂતા યે ભૂતા ભુવિ સંસ્થિતાઃ ।
યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા ॥

(ઇતિ મન્ત્રમુચ્ચારયન્, યુગપદ્ વામપાર્ષ્ણિ
ભૂતલાઘાતત્રય-કરાસ્ફોટનત્રય-ક્રૂરદૃષ્ટ્યવલોકનપૂર્વક-
તાલત્રયેણ ભૌમાન્તરિક્ષદિવ્યાન્ ભેદાવભાસકાન્ વિઘ્નાન્ ઉત્સારયેત્ ॥)

માતૃકાન્યાસઃ-
અસ્ય શ્રીસુબ્રહ્મણ્યમાતૃકાન્યસ મહામન્ત્રસ્ય બ્રહ્મા ઋષિઃ ।
ગાયત્રીચ્છન્દઃ । શ્રીસુબ્રહ્મણ્યો દેવતા ॥ હલ્ભ્યો બીજેભ્યો નમઃ ।
સ્વરેભ્યઃ શક્તિભ્યો નમઃ । બિન્દુભ્યઃ કીલકેભ્યો નમઃ ॥

શ્રીસુબ્રહ્મણ્યપૂજાઙ્ગત્વેન ન્યાસે વિનિયોગઃ ॥

ૐ અં કં ખં ગં ઘં ઙં આં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ઇં ચં છં જં ઝં ઞં ઈં તર્જનીભ્યાં નમઃ ।
ૐ ઉં ટં ઠં ડં ઢં ણં ઊં મધ્યમાભ્યાં નમઃ ।
ૐ એં તં થં દં ધં નં ઐં અનામિકાભ્યાં નમઃ ।
ૐ ઓં પં ફં બં ભં મં ઔં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ અં યં રં લં વં શં ષં સં હં ળં ક્ષં અઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥
એવં હૃદયાદિન્યાસઃ । ૐ ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ । ધ્યાનમ્-
પઞ્ચાશદ્વર્ણભેદૈર્વિહિતવદનદોઃ પાદયુક્કુક્ષિવક્ષો-
દેશાં ભાસ્વત્કપર્દાકલિતશશિકલામિન્દુકુન્દાવદાતામ્ ।
અક્ષસ્રક્કુમ્ભચિન્તાલિખિતવરકરાં ત્રીક્ષણામબ્જસંસ્થામ્
અચ્છાકલ્પામતુચ્છસ્તનજઘનભરાં ભારતીં તાં નમામિ ॥
"લમ્—" ઇત્યાદિપઞ્ચપૂજાં કૃત્વા,
ૐ અં- અમરેશ્વરાય નમઃ- (શિરસિ) ।
ૐ આં- આરાધ્યાય નમઃ- (મુખવૃત્તે)
ૐ ઇં- ઇન્દ્રપુરોગમાય નમઃ- (દક્ષિણનેત્રે)
ૐ ઈં- ઈશપુત્રાય નમઃ- (વામનેત્રે)
ૐ ઉં- ઉમાપુત્રાય નમઃ- (દક્ષિણકર્ણે)
ૐ ઊં- ઊર્ધ્વરેતસે નમઃ- (વામકર્ણે)
ૐ ઋં- ઋણાય નમઃ- (દક્ષિણનાસાપુટે)
ૐ ૠં- ૠરણાય નમઃ- (વામનાસાપુટે)
ૐ ઌં - ઋષિરૂપાય નમઃ - (દક્ષિણકપોલે)

ૐ ॡं- ॡહન્તાય નમઃ- (વામકપોલે)

ૐ એં- એકનાયકાય નમઃ (ઊર્ધ્વેઆષ્ઠે)

ૐ ઐં- ઐશ્વર્યપ્રદાય નમઃ- (અધરોષ્ઠે)

ૐ ઓં- ઓજસ્વિને નમઃ- (ઊર્ધ્વદન્તપઙ્ક્તૌ)

ૐ ઔં- ઔપમ્યરહિતાય નમઃ- (અધોદન્તપઙ્ક્તૌ)

ૐ અં - અમ્બુજાસનાય નમઃ- (જિહ્વાગ્રે)

ૐ અઃ- અક્ષીણાય નમઃ- (કણ્ઠે)

ૐ કં- કમણ્ડલુધરાય નમઃ- (દક્ષબાહુમૂલે)

ૐ ખં- ખડ્ગપાણયે નમઃ- (દક્ષકૂર્પરે)

ૐ ગં- ગઙ્ગાસુતાય નમઃ- (દક્ષમણિબન્ધે)

ૐ ઘં- ઘણ્ટાહસ્તાય નમઃ- (દક્ષકરાઙ્ગુલિમૂલે)

ૐ ઙં- ઙપ્રિયાય નમઃ- (દક્ષકરાઙ્ગુલ્યગ્રે)

ૐ ચં - ચન્દ્રશેખરાય નમઃ- (વામબાહુમૂલે)

ૐ છં- છન્દોમયાય નમઃ- (વામકૂર્પરે)

ૐ જં- જગત્પતયે નમઃ- (વામમણિબન્ધે)

ૐ  ઝં- ઝષકેતુજિત્પુત્રાય નમઃ- (વામકરાઙ્ગુલિમૂલે)

ૐ ઞં- ઞંમૂર્ત્તયે નમઃ- (વામકરાઙ્ગુલ્યગ્રે)

ૐ ટં- ટઙ્કહસ્તાય નમઃ- (દક્ષોરુમૂલે)

ૐ ઠં- ઠસ્વરૂપાય નમઃ- (દક્ષજાનુનિ)

ૐ ડં - ડમ્બરાય નમઃ- (દક્ષગુલ્ફે)

ૐ ઢં- ઢક્કાપ્રિયાય નમઃ- (દક્ષપાદાઙ્ગુલિમૂલે)

ૐ ણં- ણગમ્યાય નમઃ- (દક્ષપાદાઙ્ગુલ્યગ્રે)

ૐ તં- તત્ત્વરૂપાય નમઃ- (વામોરુમૂલે)

ૐ થં - સ્થપિષ્ટકાય નમઃ- (વામજાનુનિ)

ૐ દં- દણ્ડપાણયે નમઃ- (વામગુલ્ફે)

ૐ ધં- ધનુષ્પાણયે નમઃ- (વામપાદાઙ્ગુલિમૂલે)

ૐ નં- નગરન્ધ્રકરાય નમઃ- (વામપાદાઙ્ગુલ્યગ્રે)

ૐ પં - પદ્મહસ્તાય નમઃ- (દક્ષપાર્શ્વે)

ૐ ફં- ફણિહસ્તાય નમઃ- (વામપાર્શ્વે)

ૐ બં- બાહુલેયાય નમઃ- (પૃષ્ઠે)

ૐ ભં- ભવાત્મજાય નમઃ- (નાભૌ)

ૐ મં- મહાસેનાય નમઃ- (જઠરે)

ॐ યં- યજ્ઞમૂર્ત્તયે નમઃ- (હૃદયે)

ॐ રં- રમણીયાય નમઃ- (દક્ષકક્ષે)

ॐ લં- લમ્બોદરાનુજાય નમઃ- (ગલપૃષ્ઠે)

ॐ વં- વચદ્ભુવે નમઃ- (વામકક્ષે)

ॐ શં- શરસમ્ભવાય નમઃ- (હૃદયાદિદક્ષકરાઙ્ગુલ્યન્તં)

ॐ ષં- ષણ્મુખાય નમઃ- (હૃદયાદિવામકરાઙ્ગુલ્યન્તમ્)-

ॐ સં- સર્વલોકેશાય નમઃ- (હૃદયાદિદક્ષપાદાઙ્ગુલ્યન્તમ્)

ॐ હં- હરાત્મજાય નમઃ- (હૃદયાદિવામપાદાઙ્ગુલ્યન્તમ્)

ॐ ળં- લક્ષ્મીપતયે નમઃ- (કટ્યાદિપાદાઙ્ગુલ્યન્તમ્)

ॐ ક્ષં- ક્ષમાક્ષેત્રાય નમઃ- (કટ્યાદિ બ્રહ્મરન્ધ્રાન્તમ્)

અષ્ટમૂર્ત્તિન્યાસઃ -

ॐ કાર્તિકેયાય નમઃ- લલાટે ।

ॐ વિશાખાય નમઃ- ફાલે ।

ॐ ગુહાય નમઃ- ભ્રૂમધ્યે ।

ॐ અસુરાન્તકાય નમઃ- કણ્ઠે ।

ॐ સેનાન્યે નમઃ- હૃદયે ।

ॐ ષણ્મુખાય નમઃ- નાભૌ ।

ॐ મયૂરવાહનાય નમઃ- લિઙ્ગે ।

ॐ શક્તિપાણયે નમઃ- મૂલાધારે ।

ષડઙ્ગમૂર્ત્તિન્યાસઃ -

ॐ સાં શં સુબ્રહ્મણ્યાય નમઃ- હૃદયે ।

ॐ સીં રં કુમારાય નમઃ- શિરસિ ।

ॐ સૂં વં હરસૂનવે નમઃ- શિખાયામ્ ।

ॐ સૈં ણં સુરાગ્રજાય નમઃ- કવચે ।

ॐ સૌં ભં સેનાપતયે નમઃ- નેત્રત્રયે ।

ॐ સઃ વં સુરેશ્વરાય નમઃ- અસ્ત્રે ।

અન્તર્યાગઃ -

સ્વહૃદયકમલે શ્રીવલ્લીદેવસેનાસમેત

શ્રીસુબ્રહ્મણ્યમૂર્ત્તિં સ્વાત્મત્વેન્ વિભાવ્ય-મૂર્ત્તિં ધ્યાયેત્ ।

હૃદયકમલમધ્યે ભાતિ યત્ ચિત્સ્વરૂપં

નિખિલવિબુધમૃગ્યં સંસૃતિધ્વાન્તભાનુમ્ ।

પ્રણવમયમવેદ્યં પ્રાણિનાં પ્રાણસંસ્થં
પ્રકૃતિવિલયરૂપં નૌમિ તત્ ષણ્મુખાખ્યમ્ ॥

ષણ્મુખં દ્વાદશભુજં દ્વિષણ્નયનપઙ્કજમ્ ।
કુમારં સુકુમારાઙ્ગં કેકિવાહનમાશ્રયે ॥

દાડિમીપુષ્પસઙ્કાશં ગુઞ્જાભં કુઙ્કુમાઙ્કિતમ્ ।
ષડ્વક્ત્રસહિતં દેવં દ્વાદશાક્ષં સુમૌ લિ (નિ)નમ્ ॥

ચતુર્ભુજમુદારાઙ્ગં યજ્ઞસૂત્રેણ સંયુતમ્ ।
વરદાભયસંયુક્તં કમણ્ડલ્વક્ષધારિણમ્ ॥

વજ્રકુણ્ડલસંયુક્તં કરણ્ડમકુટોજ્જ્વલમ્ ।
હારકેયૂરકટક કટિસૂત્રૈર્વિભૂષિતમ્ ॥

રત્નવિદ્રુમભૂષાઢ્યં નવવીર સમાયુતમ્ ।
પાદનૂપુરસંયુક્તં સર્વાભરણભૂષિતમ્ ॥

સર્વલક્ષણસંયુક્તં કુમારં શઙ્કરાત્મજમ્ ।
મહાવલ્લીદેવસેનાયુક્તં સુરગણપ્રિયમ્ ॥

ઇત્થરૂપં યજામીશં સર્વાભીષ્ટપ્રદાયકમ્ ॥

(ઇતિ ધ્યાત્વા, પુષ્પાઞ્જલિમાદાય)
તેજોરૂપેણ પરિણતં, પરશિવજ્યોતિરભિન્નસ્વરૂપં, વિયદાદિ
વિશ્વકારણં, સ્વપ્રકાશં, શ્રીસુબ્રહ્મણ્ય- મૂર્ત્તિં સુષુમ્ણાપથેન
ઉદ્ગમય્ય, વિનિર્ભિન્ન- વિધિબિલવિલસદ્દશશતદળકમલાત્ વહન્,
નાસાપુટેન નિર્ગતાં, કુસુમગર્ભિતે-અઞ્જલૌ સમાનીય,
"ૐ હ્રીં શ્રીં સુબ્રહ્મણ્યાય અમૃતચૈતન્યમૂર્ત્તિં કલ્પયામિ નમઃ । "
ઇતિ મૂર્ત્તિકલ્પનં વિભાવ્ય- શ્રીસુબ્રહ્મણ્યમૂલમન્ત્રેણ દેવમાવાહયેત્ ।
ૐ હ્રીં શ્રીં । આવાહિતો ભવ ।
ૐ હ્રીં શ્રીં । સંસ્થાપિતો ભવ ।
ૐ હ્રીં શ્રીં । સન્નિધાપિતો ભવ ।
ૐ હ્રીં શ્રીં । સન્નિરુદ્ધો ભવ ।
ૐ હ્રીં શ્રીં । સમ્મુખો ભવ ।
ૐ હ્રીં શ્રીં । અવકુણ્ઠિતો ભવ ॥

(વન્દન-ધેનુ-યોનિમુદ્રાઃ ચ પ્રદર્શયેત્ ॥)

અથ અપચારઃ- ૐ હ્રીં શ્રીં હ્રીં વ્રીં સૌં સુબ્રહ્મણ્યમૂર્ત્તયે નમઃ -
પાદ્યં કલ્પયામિ નમઃ ।
અર્ઘ્યં કલ્પયામિ નમઃ ।
આચમનીયં કલ્પયામિ નમઃ ।
સકલતીર્થાભિષેકં કલ્પયામિ નમઃ ।
ધૌતવસ્ત્રં કલ્પયામિ નમઃ ।
ગન્ધાન્ કલ્પયામિ નમઃ ।
યજ્ઞોપવીતં કલ્પયામિ નમઃ ।
કુસુમમાલાં કલ્પયામિ નમઃ ।
મકુટાદિસર્વાભરણાનિ કલ્પયામિ નમઃ ।
મધુપર્કં કલ્પયામિ નમઃ ।
શુદ્ધાચમનીયં કલ્પયામિ નમઃ ।
મઙ્ગલહારતિં કલ્પયામિ નમઃ ॥

તદ્યથા (ષટ્કોણે સ્વાગ્રાદિપ્રાદક્ષિણ્યેન, મધ્યે ચ દીપાન્
સ્થાપયિત્વા-અક્ષતૈઃ પૂજયેત્)
ૐ વચદ્ભુવે નમઃ । ૐ જગદ્ભુવે નમઃ । ૐ વિશ્વભુવે નમઃ ।
ૐ રુદ્રભુવે નમઃ । ૐ બ્રહ્મભુવે નમઃ । ૐ ભુવનભુવે નમઃ ।
ૐ ષણ્મુખાય નમઃ । (મૂલેન ચ દીપં અભ્યર્ચયેત્ ।)
"ૐ જગદ્ધ્વનિમન્ત્રમાતઃ સ્વાહા -" (ઇતિ-ગન્ધાદિભિઃ ઘણ્ટાં સમ્પૂજ્ય
- તાં વાદયન્ દીપપાત્રમામસ્તકમુદ્ધૃત્ય-)
"ૐ-રાજાધિરાજાય પ્રસહ્યસાહિને નમો વયં વૈશ્રવણાય કુર્મહે।
સ મે કામાન્કામકામાય મહ્યમ્ કામેશ્વરો વૈશ્રવણો દદાતુ ।
કુબેરાય વૈશ્રવણાય મહારાજાય નમઃ ॥ "
શ્રીવલ્લીદેવસેના સમેત સુબ્રહ્મણ્યમૂર્ત્તયે નમઃ । મઙ્ગલહારતિકં
કલ્પયામિ નમઃ ॥ (ઇતિ દેવસ્ય દક્ષભાગે સ્થાપયેત્ ।)
"ૐ હ્રીં શ્રીં હ્રીં વ્રીં સૌં સુબ્રહ્મણ્યમૂર્ત્તયે નમઃ । "
છત્રં કલ્પયામિ નમઃ । ચામરયુગળં કલ્પયામિ નમઃ ।
દર્પણં કલ્પયામિ નમઃ । તાળવીજનં કલ્પયામિ નમઃ ।
ગન્ધાન્ કલ્પયામિ નમઃ । પુષ્પં કલ્પયામિ નમઃ ।
ધૂપં કલ્પયામિ નમઃ । દીપં કલ્પયામિ નમઃ ।
નૈવેદ્યં કલ્પયામિ નમઃ । નીરાજનં કલ્પયામિ નમઃ ॥

(ઇત્યુપચારાન્ કૃત્વા બલિં દદ્યાત્ ।)
ત્રિકોણ વૃત્ત ચતુરશ્રાત્મકં મણ્ડલં મત્સ્યમુદ્રયા નિર્માય-
“ઐં વ્યાપકમણ્ડલાય નમઃ ” - (ઇતિ મણ્ડલમભ્યર્ચ્ય)-
અર્ધભક્તપૂરિતોદકં બલિપાત્રં મણ્ડલોપરિ સંસ્થાપ્ય સુમિત્ર !
ઇહાગચ્છ- આગચ્છ ! બલિં ગૃહાણ- ગૃહાણ સ્વાહા ॥ (ઇતિ
દક્ષકારાર્પિતં- વામકરતત્ત્વમુદ્રયા સ્પૃષ્ટં સલિલં, બલ્યુપરિ
દત્ત્વા- બાણમુદ્રયા બલિં સુમિત્રેણ ગ્રસિતં વિભાવ્ય-યોનિમુદ્રયા પ્રણમેત્)
તતઃ પાદૌ પ્રક્ષાલ્ય-આચમ્ય-પ્રદક્ષિણનમસ્કારાન્ કૃત્વા-યથાશક્તિ
મૂલમન્ત્રં જપેત્ ॥

ૐ ગુહ્યાતિગુહ્યગોપ્તા ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવ ત્વત્પ્રસાદાન્મયિ સ્થિરા ॥

(- ઇતિ જપં સમર્પયેત્ ॥)

સુબ્રહ્મણ્યસ્તોત્રમ્
હૃદયકમલમધ્યે ભાતિ યત્ ચિત્સ્વરૂપં
નિખિલવિબુધમૃગ્યં સંસૃતિધ્વાન્તભાનુમ્ ।
પ્રણવમયમવેદ્યં પ્રાણિનાં પ્રાણસંસ્થં
પ્રકૃતિવિલયરૂપં નૌમિ તત્ ષણ્મુખાખ્યમ્ ॥

પદ્માસુરાર્દનમશેષ મુનીન્દ્રપૂજ્યં
સર્વામરેન્દ્ર મકુટોજ્જ્વલદઙ્ઘ્રિયુગ્મમ્ ।
સર્વાગમેડ્યપરતત્ત્વમયં ષડાસ્યં
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

યત્સર્વસંસૃતિભયાપહમેકમીડ્યં
સદ્યો મુમુક્ષુભિરખણ્ડનિજસ્વરૂપમ્ ।
સચ્ચિન્મયં પરમનિત્યસુખાત્મકં તત્
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

સંસારદુઃખદવ પાવકદહ્યમાનઃ
શાન્ત્યાદિ સદ્ગુણવિહીનમનાસ્સકામઃ ।
મૂઢોઽસ્મિ તદ્ ભવવિમોચનકાઙ્ક્ષયાદ્ય
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

યત્પાદપઙ્કજવિલોકનજાતહર્ષાઃ

બાષ્પામ્બુસિક્તતનવો બહવો વિમુક્તાઃ ।
નાદ્યાપિ માતુરુદરં ક્વચિદાપ્નુવન્તિ
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

કામાદિભિઃષડરિભિઃ પ્રબલૈઃ વિશઙ્કઃ
સંપીડ્યમાન ઇહ ષણ્મુખ તાવકોઽપિ।
એષોઽસ્મ્યનન્યશરણઃ પરમાત્મબન્ધો
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

સ્કન્દ ત્વદીયચરિતાન્યખિલામયઘ્ના-
ન્યત્રાસ્તિકો નુ ભુવિ વર્ણયિતું સમર્થઃ ।
ભૂમ્યગ્નિદિવ્યસરિતો વિદુરેવ શક્તિં
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

શ્રીકાર્તિકેય ગુહ ષણ્મુખ શક્તિપાણે
વલ્લીસમેત શિખિવાહન તારકારે ।
શ્રીદક્ષિણાનનસમુદ્ભવ પાહિ નિત્યં
ત્વામેવ સદ્ગુરુમહં સતતં નમામિ ॥

ષણ્મુખં દ્વાદશભુજં દ્વિષણ્ણયનપઙ્કજમ્ ।
કુમારં સુકુમારાઙ્ગં કેકિ વાહનમાશ્રયે ॥

(ઇતિ સ્તુત્વા, વટુકપૂજાં કુર્યાત્ ॥)
શ્રીસુબ્રહ્મણ્યમૂર્ત્તિં પઞ્ચોપચારૈઃ ઉપચરેત્ ।

પૂજાસમર્પણમ્
સાધુ વાઽસાધુ વા કર્મ યદ્યદાચરિતં મયા ।
તત્સર્વં કૃપયા દેવ ગૃહાણારાધનં તવ ॥

દેવનાથ ગુરો સ્વામિન્ દેશિક સ્વાત્મનાયક ।
ત્રાહિ ત્રાહિ કૃપાસિન્ધો પૂજાં પૂર્ણતરં કુરુ ॥

(- ઇતિ દેવસ્ય હસ્તે પૂજાં સમર્પયેત્ ॥)
શઙ્ખમુદ્ધૃત્ય, દેવસ્યોપરિ ત્રિઃ પરિભ્રામ્ય, તજ્જલં હસ્તે
આદાય, આત્માનં પ્રોક્ષ્ય, સર્વાન્ જનાનપિ પ્રોક્ષેત્ ॥ તતઃમૂલેન
તીર્થપ્રાશનં કુર્યાત્ ।
જ્ઞાનતોઽજ્ઞાનતો વાપિ યન્મયાઽઽચરિતં ગુહ ।

તવ કૃત્યમિતિ જ્ઞાત્વા ક્ષમસ્વ શિવ ષણ્મુખ ॥

- ઇતિ ક્ષમાપયેત્ ॥

ૐ હૃત્પદ્મકર્ણિકા મધ્યે શક્તિભિઃ સહ ષણ્મુખ ।
પ્રવિશ ત્વં મહાદેવ સર્વૈરાવરણૈઃ સહ ॥

- ઇતિ ખેચર્યા તેજોરૂપેણ પરિણતં દેવં, પૂર્વવદ્ હૃદયં નીત્વા,
તત્ર દેવં પઞ્ચોપચારૈઃ સમ્પૂજ્ય, આત્માઽભિન્નસંવિદ્રૂપેણ ભાવયેત્ ।

॥ શ્રીસુબ્રહ્મણ્યાવરણપૂજાક્રમઃ ॥

બિન્દુ-ત્રિકોણ-ષટ્કોણ-ષડ્દલ-દ્વાદશદલ-ત્રિવલય -
ભૂપુરત્રયાત્મકે યન્ત્રે શ્રીસુબ્રહ્મણ્યાવરણપૂજાં કુર્યાત્ ।
અથાહં બૈન્દવે ચક્રે સત્યસિંહાસને શુભે ।
સમાસીનં ગુહં વન્દે પરં બ્રહ્મણ્યસંજ્ઞકમ્ ॥

ઇતિ પુષ્પાઞ્જલિં દત્વા બિન્દૌ મૂલેન । બ્રહ્મણ્ય શ્રીપાદુકાં પૂજયામિ
તર્પયામિ નમઃ । ઇતિ દશવારં સન્તર્પ્ય । અગ્નીશાસુરવાયુકોણેષુ મધ્યે
દિક્ષુ ચ ષડઙ્ગાર્ચનમ્-
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
બ્રં હૃદયાય નમઃ । હૃદયશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
હ્મં શિરસે સ્વાહા । શિરઃ શક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ણ્યં શિખાયૈ વષટ્ । શિખાશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
યં કવચાય હું। કવચશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં । નં નેત્રત્રયાય વૌષટ્ । નેત્રશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મં અસ્ત્રાય ફટ્ । અસ્ત્રશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ગુરુમણ્ડલાર્ચનં ત્રિરેખાસુ-
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
દિવ્યસિદ્ધમાનવૌઘેભ્યો નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
દિવ્યૌઘઃ- । પ્રથમરેખાયાં -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

દક્ષિણામૂર્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
નારાયણ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
બ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સનક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સનાતન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સનન્દન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સનત્કુમાર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
સિદ્ધૌઘઃ-દ્વિતીયરેખાયાં -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કશ્યપ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અત્રિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ભરદ્વાજ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વિશ્વામિત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ગૌતમ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
જમદગ્નિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વસિષ્ઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
શુક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અગસ્ત્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ઋભુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

નિદાઘ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

દત્તાત્રેય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

માનવૌઘઃ- તૃતીયરેખાયાં-

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ગોરક્ષાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

મત્સ્યાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

કોઙ્કુણાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ભોગાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

કલ્હાટાનન્દનાથ  શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

વીરેન્દ્રાનન્દનાથ  શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

મલયાચલાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

મધ્યાનન્દનાથ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ગિરાનન્દનાથ  શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

પરમેષ્ઠિગુરુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

પરમગુરુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ॐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

સ્વગુરુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ગન્ધ-પુષ્પ-ધૂપ-દીપ-નૈવેદ્ય-તામ્બૂલ-નીરાજનાદ્યુપચારાન્ કૃત્વા ।

આવરણપૂજા ।
સચ્ચિદાનન્દ સર્વજ્ઞ સુબ્રહ્મણ્ય શિવાત્મક ।
અનુજ્ઞાં દેહિ મે સ્વામિન્ પરિવારાર્ચનાય તે ॥

પ્રથમાવરણમ્ (ભૂપુરત્રયે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 હં દિક્ચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
પ્રથમરેખાયાં -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 અણિમાસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 મહિમાસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 ગરિમાસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 લઘિમાસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 પ્રાપ્તિસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 પ્રાકામ્યસિદ્ધિ  શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 ઈશિત્વસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 વશિત્વસિદ્ધિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
દ્વિતીયરેખાયામ્ -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 વિવેક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 વૈરાગ્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
 શમ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
દમ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઉપરતિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
તિતિક્ષા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
શ્રદ્ધા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સમાધાન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મુમુક્ષુતા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
શ્રવણ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મનન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
નિદિધ્યાસન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
તૃતીયરેખાયામ્ -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરબાહુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરકેસરિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરમાહેન્દ્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરમહેશ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરપુરન્દર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરરાક્ષસ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

વીરમાર્તાણ્ડ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરાન્તક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વીરધીર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
દિક્ચક્રાધિષ્ઠિતચિદગ્નિસ્વરૂપાપરિચ્છિન્નપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેન ત્રિઃ સન્તર્પ્ય ગન્ધાદ્યુપચારાન્ કૃત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

ઇતિ સ્રામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે સમર્પ્ય । અનેન
પ્રથમાવરણાર્ચનેન ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ ।
યોનિમુદ્રયા પ્રણમેત્ ।

દ્વિતીયાવરણમ્- (વૃત્તત્રયે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સં રં તં ગુણચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
પ્રથમવૃત્તે -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સત્ત્વગુણ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
રજોગુણ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
તમોગુણ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
માયા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
દ્વિતીયવૃત્તે -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પરાવાગ્દેવતા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પશ્યન્તીવાગ્દેવતા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મધ્યમાવાગ્દેવતા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વૈખરી વાગ્દેવતા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
તૃતીયવૃત્તે -
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ભૂતપઞ્ચક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ગુણપઞ્ચક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
જ્ઞાનેન્દ્રિયપઞ્ચક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કર્મેન્દ્રિયપઞ્ચક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સં રં તં ગુણચક્રાધિષ્ઠિતગુણાતીતસ્વરૂપનિસ્ત્રૈગુણ્યપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । (મધ્યે)
(મૂલેન ત્રિઃ સન્તર્પ્ય ગન્ધાદ્યુપચારાન્ કૃત્વા)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

ઇતિ સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે સમર્પ્ય । અનેન દ્વિતીયાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।

તૃતીયાવરણમ્ । (દ્વાદશદલકમલે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કં કાલચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કલા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કાષ્ઠા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઘટિકા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

મુહૂર્ત શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
દિવસ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પક્ષ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
માસ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઋતુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અયન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સંવત્સર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
યુગ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કાલ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
કાલચક્રાધિષ્ઠિતકાલકાલસ્વરૂપ નિત્યપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેન ત્રિઃ સન્તર્પ્ય ગન્ધાદ્યુપચારાન્ કૃત્વા
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે સમર્પ્ય । અનેન તૃતીયાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।

તુરીયાવરણમ્ (ષડ્દળપદ્મે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સં સર્વજ્ઞચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સર્વજ્ઞાશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

નિત્યતૃપ્તશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અનાદિબોધશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સ્વતન્ત્રશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અનન્તબોધશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ભૂલોક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અગ્નિમણ્ડલ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અન્તરિક્ષ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સૂર્યમણ્ડલ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સ્વર્ગ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સોમમણ્ડલ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
સં સર્વજ્ઞચક્રાધિષ્ઠિતભૂમાસ્વરૂપસર્વૈશ્વર્યપ્રદપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેન ત્રિઃ સન્તર્પ્ય ગન્ધાદ્યુપચારાન્ કૃત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં તુરીયાવરણાર્ચનમ્ ॥

સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે સમર્પ્ય । અનેન તુરીયાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।

પઞ્ચમાવરણમ્ (ષટ્કોણચક્રે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઐં વાગ્ભવચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

પ્રજ્ઞાનં બ્રહ્મ । ઋગ્વેદમયમહાવાક્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

અહં બ્રહ્માસ્મિ । યજુર્વેદમયમહાવાક્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

તત્ત્વમસિ । સામવેદમયમહાવાક્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

અયમાત્મા બ્રહ્મ । અથર્વવેદમયમહાવાક્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

શિક્ષાશાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

કલ્પશાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

વ્યાકરણશાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

છન્દઃશાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

જ્યોતિશ્શાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

નિરુક્તશાસ્ત્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ હ્રીં નમઃ શિવાય । શૈવદર્શન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ નમો નારાયણાય । વૈષ્ણવદર્શન૦।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ શ્રીં હ્રીં શ્રીં । શાક્તદર્શન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ ગં ગણપતયે નમઃ । ગાણાપત્યદર્શન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ હ્રીં ઘૃણિઃ સૂર્ય આદિત્યોમ્ । સૌરદર્શન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

ૐ ભ્રં ભૈરવાય નમઃ । કાપાલિકદર્શન શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

પરશિલાપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
જયન્તીપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
શુદ્ધચિત્તપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પૂર્ણગિરિપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પૂર્ણફલપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
વનગિરિપીઠ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઐં વાગ્ભવચક્રાધિષ્ઠિતવાચામગોચરસ્વરૂપપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
(મૂલેન ત્રિઃ સન્તર્પ્ય ગન્ધપુષ્પાદ્યુપચારાન્ કૃત્વા ।)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં પઞ્ચમાવરણાર્ચનમ્ ॥

સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે । સમર્પ્ય અનેન પઞ્ચમાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।

ષષ્ઠાવરણમ્ (ત્રિકોણે)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ક્લીં । શક્તિચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અં અકારાત્મક- ઇચ્છાશક્તિસ્વરૂપવાણિસમેતબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ઉં ઉકારાત્મકજ્ઞાનશક્તિ- સ્વરૂપવૈષ્ણવીસમેતવિષ્ણુ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મં મકારાત્મકક્રિયાશક્તિસ્વરૂપરુદ્રાણીસમેતરુદ્ર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ૐ ઓંકારાત્મકપરાશક્તિસ્વરૂપમાયાવિશિષ્ટકારણેશ્વર શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।

સત્સ્વરૂપવિદ્યાશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ચિત્સ્વરૂપવિદ્યાશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
આનન્દસ્વરૂપવિદ્યાશક્તિ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
ક્લીં શક્તિચક્રાધિષ્ઠિતવિદ્યાસ્વરૂપપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેન ત્રિઃ સન્તર્પ્ય । ગન્ધાદ્યુપચારાન્ કૃત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં ષષ્ઠાખ્યાવરણાર્ચનમ્ ॥

સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે સમર્પ્ય । અનેન ષષ્ઠાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।

સપ્તમાવરણમ્ (બિન્દૌઃ)
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પરબ્રહ્મચક્રાય નમઃ । ઇતિ પુષ્પાઞ્જલિં દત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
મૂલમ્ । બ્રહ્મણ્ય શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
પરબ્રહ્મચક્રાધિષ્ઠિતપરબ્રહ્મ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેન ત્રિઃ સન્તર્પ્ય । ગન્ધાદ્યુપચારાન્ કૃત્વા ।
ૐ હ્રીં શ્રીં ઐં ક્લીં સૌઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ
ભક્ત્યા સમર્પયે તુભ્યં સપ્તમાવરણાર્ચનમ્ ॥

સામાન્યાર્ઘ્યં દેવસ્ય વામહસ્તે દત્વા । અનેન સપ્તમાવરણાર્ચનેન
ભગવાન્ સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ । યોનિમુદ્રયા પ્રણમેત્ ।
તતઃ શ્રીસુબ્રહ્મણ્યસિદ્ધનામાષ્ટોત્તરશતનામભિઃ સમ્પૂજ્ય ।
ધૂપ-દીપ-નૈવેદ્ય-તામ્બૂલ-નીરાજન-મન્ત્રપુષ્પાણિ સમર્પયેત્ ।

ઇતિ સુબ્રહ્મણ્યપૂજાવિધિઃ સમાપ્તા ।

Proofread by Preeti N. Bhandare

*Shri Subrahmanya Puja Vidhi*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*